E-ISSN-2584-2870 DOI: https://doi.org/10.65833/dbs.2026.025

देवभूमि-सौरभम्
Devabhūmisaurabham

Vol 2 Issue 2 July-Dec 2025 Devabhūmisaurabham International Journal of CSU Shri Raghunath Kirti Campus Devprayag Uttarakhand India

# भास्करीयगोलाध्याये ऋतुवर्णनम्

**गिरीशभट्टः बि**
सिद्धान्तज्यौतिषशास्त्रे विद्यावारिधि(Ph.D.)-शोधच्छात्रः
ज्योतिष-वास्तुविभागः
राष्ट्रियसंस्कृतविश्वविद्यालयः, तिरुपतिः (आन्ध्रप्रदेशः)
दूरभाषसङ्ख्या – 8277210178, 6361249486
अणुवाग् (E-mail) : bhatgirish1997@gmail.com

**दिवाकरशर्मा**
आचार्यः (PG) – सिद्धान्तज्यौतिषशास्त्रम्,
ज्योतिष-वास्तुविभागः,
राष्ट्रियसंस्कृतविश्वविद्यालयः, तिरुपतिः (आन्ध्रप्रदेशः)
दूरभाषसङ्ख्या – 9459470255, 9817270255
अणुवाग् (E-mail) : diwakar.samskritam@gmail.com

**सारांशः –** भास्कराचार्येण सिद्धान्तशिरोमणिः इति गणित-खगोलशास्त्रयोः सम्बद्धः ग्रन्थः लिखितः । ग्रन्थेऽस्मिन् लीलावती, बीजगणितम्, ग्रहगणितम्, गोलाध्यायश्चेति चत्वारो भागाः वर्तन्ते । तत्र गोलाध्यायस्यान्ते ऋतुवर्णनसंज्ञकः कश्चन अध्यायो भास्कराचार्येण उपनिबद्धः । तस्मिन् अध्याये साहित्यरीत्या ऋतूनां वर्णनं भास्कराचार्येण कृतम् । यष्टियन्त्रेण वेधेन साधितायाः अर्कदोर्ज्यायाः वशात् अर्कस्फुटस्य साधनाय वर्षचरणस्य ज्ञानमावश्यकम् । वर्षचरणस्य ज्ञानार्थम् ऋतुलक्षणानि द्रष्टव्यानि भवन्ति । वर्तमानकाले प्रकृतौ दृश्यमानानां लक्षणानामाधारेण इदानीं कः ऋतुः प्रचलन्नस्तीति ज्ञात्वा तद्द्वारा अधुना वयं वर्षस्य कस्मिन् चरणे स्मः इति ज्ञातुं शक्नुमः । इत्थं वर्षचरणज्ञानाय ऋतुज्ञानमावश्यकम् । ऋतुज्ञानाय ऋतुलक्षणानां ज्ञानम् आवश्यकम् । एवं प्रकृतौ कस्मिन् ऋतौ कीदृशानि लक्षणानि दृश्यन्ते इति ज्ञानाय एव भास्कराचार्येण गोलाध्यायस्यान्ते ऋतुलक्षणाध्यायो उपनिबद्धः ।

**कूटशब्दाः –** ऋतुः, दोर्ज्या, क्रान्तिज्या, शुचिः, निदाघः

**प्रस्तावना**

एकस्मिन् वर्षे षट् ऋतवः, द्वादश चान्द्रमासाश्च वर्तन्ते । प्रत्येकम् ऋतौ द्वौ चान्द्रमासौ भवतः । षट्सु ऋतुषु द्वादश चान्द्रमासानां विभागक्रमः अधोनिर्दिष्टरीत्या वर्तते –

| क्र.सं. | ऋतवः | चान्द्रमासाः | क्र.सं. | ऋतवः | चान्द्रमासाः |
|---|---|---|---|---|---|
| १. | वसन्तः | चैत्रः, वैशाखः | ४. | शरत् | आश्वयुजः, कार्त्तिकः |
| २. | ग्रीष्मः | ज्येष्ठः, आषाढः | ५. | हेमन्तः | मार्गशीर्षः, पुष्यः |
| ३. | वर्षा | श्रावणः, भाद्रपदः | ६. | शिशिरः | माघः, फाल्गुनः |

**कोष्ठकः १ : चान्द्रमासेषु ऋतूनां विभागः**

साहित्यशास्त्रीयग्रन्थेषु ऋतूनां वर्णनं वयं द्रष्टुं पारयामः । इत्थं यद्यपि ऋतुवर्णनं साहित्यशास्त्रीयविषयस्तथापि खगोलशास्त्रसम्बद्धे सिद्धान्तशिरोमणिग्रन्थे गोलाध्याये ऋतुवर्णनाध्यायः भास्कराचार्येण किमर्थमुपनिबद्धः ? इति संशयः सहजतया एव मनसि आयाति । अस्य सन्देहस्योत्तरं भास्कराचार्येण यन्त्राध्याये यष्टियन्त्रेण सूर्यस्फुटसाधनक्रमप्रतिपादनवेलायामेव, **"ऋतुचिह्नैर्ज्ञानं स्याद् ऋतुचिह्नान्यग्रतस्ततो वक्ष्ये"**[1] इत्यनेन श्लोकार्धेन उक्तमस्ति । यष्टियन्त्रेण साधितां रविक्रान्तिज्यां त्रिज्यया सङ्गुण्य जिनभागज्यया (परमक्रान्तिज्यया) विभजेत् । तदानीम् अर्कदोर्ज्या (रविभुजज्या) समुपलभ्यते । अर्कदोर्ज्यातो रविभुजांशाः लभ्यन्ते । रविभुजांशेभ्यः अर्कस्फुटस्य साधनाय वर्षचरणस्य ज्ञानमावश्यकम् । वर्षचरणज्ञानं तु ऋतुलक्षणैः भवति । एवं रविभुजांशेभ्यः रविस्फुटसाधनाय आवश्यकस्य वर्षचरणस्य ज्ञानार्थमेव गोलाध्याये यन्त्राध्यायस्यानन्तरम् ऋतुवर्णनाध्यायो भास्कराचार्येणोपनिबद्धः ।

ऋतुवर्णनाध्याये भास्कराचार्येण आदिमैः एकादशभिः श्लोकैः वसन्तादीनां षण्णां ऋतूनां कालेषु प्रकृतिः कीदृशी भवतीति वर्णितम् । वसन्तादीनाम् ऋतूनां कालेषु भास्कराचार्येण कृतं प्रकृतिसौन्दर्यवर्णनम् प्रतिपादनम् अधः उपस्थाप्यन्ते ।

**वसन्तर्तोः वर्णनम्**

ऋतुवर्णनाध्यायस्य प्रथमद्वितीयश्लोकयोः भास्कराचार्येण वसन्तर्तोः वर्णनं कृतम् । तत्र प्रथमश्लोको यथा –

**उत्फुल्लन्नवमल्लिकापरिमलभ्रान्तभ्रमद्भ्रामरे**

**रे पान्थाः कथमव्यथानि भवतां चेतांसि चैत्रोत्सवे ।**

**मन्दान्दोलितचूतनूतनघनस्फारस्फुरत्पल्लवै-**

**रुद्वेलन्नववल्लरीष्विति लपन्त्युच्चैः कलं कोकिलाः ॥**[2]

इति ।

चान्द्रवर्षस्य प्रथमः ऋतुः वसन्तर्तुः । वसन्तर्तोः प्रथमो मासः चैत्रमासः अथवा मधुमासः । यदा चैत्रमासः समागच्छति तदानीं मन्दतया आन्दोलितानां चूत(आम्र)वृक्षाणां नूतनैः घनैः = निबिडैः (परस्परं संलग्नैः)

---

[1] सिद्धान्तशिरोमणिः – गोलाध्यायः – यन्त्राध्यायः – श्लोकः ३८

[2] सिद्धान्तशिरोमणिः – गोलाध्यायः – ऋतुवर्णनम् – श्लोकः १

स्फारैः = कम्पमानैः स्फुरद्भिः = चलद्भिः पल्लवैः उद्वेलत्सु (उपरि उड्डीयमानासु) नववल्लरीषु = नवकिसलयेषु स्थिताः कोकिलाः एवं प्रकारेण उच्चैः कलं = मधुरं लपन्ति –

"रे पान्थाः ! चैत्रोत्सवः समागतोऽस्ति । उत्फुल्लन्त्यः नवमल्लिकापुष्पाणि यानि सन्ति तेषां परिमलेन भ्रान्ताः भ्रमराः समूहेन तत्परिमलमन्विषन् सर्वत्र गच्छन्तो (उड्डयन्तो) दृश्यन्ते । एतादृशः चैत्रोत्सवः समागतश्चेदपि भवतां चेतांसि कथम् (किमर्थम्) अव्यथानि भवन्ति ? (किमर्थं भवतां चेतांसि (मनांसि) दैनन्दिनव्यवहारेभ्यः चञ्चलानि न भवन्ति ? किमर्थं भवन्तः चैत्रोत्सवं द्रष्टुं न समागताः ?)" इति ।

एवम् अत्र काव्यरूपेण भास्कराचार्येण चैत्रमासे दृश्यमानानि प्राकृतिकलक्षणानि (प्राकृतिकचिह्नानि) प्रतिपादितानि । अत्र चैत्रमासः इति वसन्तर्तोः एकदेशग्रहणात् सम्पूर्णः वसन्तर्तुः ग्राह्यः । अर्थात् समग्रे वसन्तर्तौ एतानि लक्षणानि दृश्यन्ते, किन्तु एतेषां लक्षणानाम् आरम्भस्तु चैत्रमासस्यारम्भे भवतीति अत्रावगन्तव्यम् । वसन्तर्तौ इतोऽपि कानिचन लक्षणानि दृश्यन्ते । तानि लक्षणानि भास्कराचार्येण द्वितीये श्लोके प्रतिपादितानि –

**स्वकुसुमैर्मलिनामिव मालतीमवहसन्ति वसन्तजमल्लिकाः ।**

**उपवनं विनिवारयतीव ताः किसलयैर्मलयानिलकम्पितैः ॥**[3]

इति ।

श्लोकेऽस्मिन् भास्कराचार्येण वसन्तर्तौ दृश्यमानानां मल्लिकापुष्पाणां वर्णनं कृतम् । यथा – "वसन्तकालोत्पन्नाः मल्लिकावल्ल्यः स्वकीयैः मल्लिकाकुसुमैः मलिनां (ईषत्कृष्णवर्णयुक्तां) मालतीम् (मालतीपुष्पम्) अवहसन्तीव (अपहासं कुर्वन्तीव) दृश्यन्ते" इति ।

मालतीपुष्पाणि ईषत्कृष्णवर्णयुक्तानि भवन्ति । मल्लिकापुष्पाणि तु शुभ्र(शुक्ल)वर्णयुक्तानि भवन्ति । मल्लिकापुष्पाणि तु वसन्तकाले एव उत्पद्यन्ते । अतो वसन्तकाले तेषां शुभ्रवर्णयुक्तानां मल्लिकापुष्पाणां मध्ये ईषत्कृष्णवर्णयुक्तानि मालतीपुष्पाणि किञ्चित् कान्तिहीनानीव दृश्यन्ते इत्यभिप्रायः ।

तथा च ताः वसन्तजमल्लिकाः (वसन्तकालोत्पन्नमल्लिकावल्ल्यः) मलयानिलकम्पितैः किसलयैः (नवपल्लवैः) उत्पन्नः शीतलः अनिलः (वायुः) उपवनं (उपवनगमनं) विनिवारयतीव (दूरीकुर्वतीव) दृश्यते ।

मलयपर्वतेभ्यः आगतेन वातेन वसन्तजमल्लिकानां किसलयाः ताडितास्सन्तः कम्पन्ते । तस्मात् उत्पन्नः शीतलो वायुः वातायनेभ्यो गृहस्यान्तः एव प्रविश्य शीतलं वातावरणं जनयति । अतः तदानीं तापनिवारणार्थम् उपवनगमनस्य आवश्यकता एव न भवति । गृहे स्थीयते चेदपि शीतलता अनुभूयते । अत एवोक्तं भास्कराचार्येण – **"उपवनं विनिवारयतीव ताः किसलयैर्मलयानिलकम्पितैः"** इति ।

एवं भास्कराचार्येण श्लोकद्वये वसन्तर्तोः वर्णनं कृतम् । अनयोः श्लोकयोः निष्कर्षरूपेण वसन्तर्तौ अधोनिर्दिष्टानि लक्षणानि दृश्यन्ते इति वक्तुं शक्नुमः –

१. वसन्तर्तौ आम्रवृक्षेषु किसलयाः जायन्ते ।

२. वसन्तर्तौ नवमल्लिकापुष्पाणि जायन्ते ।

३. वसन्तर्तौ कोकिलाः मधुरं कूजन्ति ।

४. शीतलो वायुः वाति ।

---

[3] सिद्धान्तशिरोमणिः – गोलाध्यायः – ऋतुवर्णनम् – श्लोकः २

एतादृशानि प्राकृतिकलक्षणानि यस्मिन् काले दृश्यन्ते सः कालो वसन्तर्तुरिति ज्ञातव्यम् ।

**ग्रीष्मर्तोः वर्णनम्**

भास्कराचार्यः ऋतुवर्णनाध्यायस्य तृतीय-चतुर्थाभ्यां श्लोकाभ्यां ग्रीष्मर्तोः वर्णनं चकार । तृतीयश्लोको यथा –

**विहाय सौधं तृणकुड्यमण्डपे प्रसिच्यमने सलिलैः समन्ततः ।**

**शुचौ रमन्ते विरलं विलासिनः प्रियाजैः सीकरसेचनोन्मुखाः ॥**[4]

इति ।

ज्येष्ठ-आषाढमासाभ्यां ग्रीष्मर्तुः भवति । ग्रीष्मर्तोः आदिमो मासः ज्येष्ठमासः । ज्योष्ठमासस्य 'शुचि' इत्यपरं नाम । अत्र श्लोके "शुचौ" इति ज्येष्ठमासपर्यायपदस्य प्रयोगेण ग्रीष्मर्तोः एकदेशग्रहणं कृतम् । किन्तु अत्रोक्तानि लक्षणानि ग्रीष्मर्तोः उभयोरपि मासयोः सम्भवन्तीति अवगन्तव्यम् ।

शुचिमासस्य अर्थात् ज्येष्ठमासस्य आरम्भः यदा भवति तदानीं विलासिनः पुरुषाः स्वकीयं सौधं = गृहं विहाय समन्ततः सलिलैः प्रसिच्यमाने तृणकुड्यमण्डले (तृणैः कृतया भित्त्या युक्ते मण्डपे) स्थित्वा स्वकीयैः प्रियाजनैः (स्वकीयपत्नीभिः) साकं सीकरैः = जलकणैः सेचनोन्मुखाः सन्तः विरलं = अल्पकालं रमन्ते ।

ज्येष्ठमासे आतपस्य तापः अधिको भवति । अतो गृहस्यान्तः स्थातुं क्लेशो जायते । अतः विलासिनः पुरुषाः तृणकुड्यमण्डपं प्रति गत्वा स्वकीयभार्याभिः साकं जलकणैः परस्परं सेचनं कृत्वा रमन्ते इत्यभिप्रायः ।

ग्रीष्मर्तौ आतपस्य तापः अधिको भवतीति सूचयितुमत्र भास्कराचार्येण एवं प्रकारेण वर्णनं कृतम् ।

चतुर्थश्लोको यथा –

**निदाघदाहार्तिविघातहेतवे वनाय कामोच्छ्रितचूतकेतवे ।**

**व्रजन्ति वापीजलकेलिलालसाः शुचौ रतिस्वेदगलज्जलालसाः ॥**[5]

इति ।

अस्यायमभिप्रायः – शुचौ = ज्येष्ठमासे निदाघकालस्य = ग्रीष्मर्तोः दाहेन आर्तेः = पीडायाः विघातहेतवे = निवारणार्थं (परिहारार्थं) रतिस्वेदगलज्जलालसाः जनाः (रतिक्रीडावसरे शरीरे उत्पन्नस्य स्वेदजलस्य वशात् कार्येषु अलसाः जनाः) वापीजलकेलिलालसाः सन्तः (वापीषु जलक्रीडां कर्तुम् इच्छुकाः सन्तः) कामोच्छ्रितचूतकेतवे वनाय (अत्यन्तम् उच्छ्रिताः अर्थात् बहून्नताः चूतवृक्षाः = आम्रतरवः एव केतवः = चिह्नानि येषु वनेषु भवन्ति तान् वनान् प्रति) व्रजन्ति = गच्छन्ति ।

ग्रीष्मर्तौ उष्णता अतिशयेन भवतीत्यभिप्रायः । एवं यस्मिन् काले उष्णता अधिका भवति सः कालो ग्रीष्मर्तुरित्यवगन्तव्यम् ।

**वर्षर्तोः वर्णनम्**

---

[4] सिद्धान्तशिरोमणिः – गोलाध्यायः – ऋतुवर्णनम् – श्लोकः ३

[5] सिद्धान्तशिरोमणिः – गोलाध्यायः – ऋतुवर्णनम् – श्लोकः ४

"वर्षर्तुः" इति नाम्ना एव ज्ञायते यत् वर्षर्तौ वृष्टिः अधिका भवतीति । यस्मिन् काले वृष्टिरत्यधिका भवति तस्मिन् काले वर्षर्तुः प्रचलतीति अवगन्तव्यम् । अस्य वर्षर्तोः वर्णनं भास्कराचार्येण ऋतुवर्णनाध्यायस्य पञ्चम-षष्ठ-सप्तमश्लोकैः (त्रिभिः श्लोकैः) कृतम् । यथा –

**मदनदहनखिन्नामागतेऽप्येत्य काले**

**परिमलबहलानां मालतीनां नदीनाम् ।**

**अदय दयित सिञ्चस्यात्मदृग्वारिणा किं**

**परिमलबहलानां मा लतीनां न दीनाम् ॥**[6]

वर्षाकाले समागते सति हृदयस्थम् अदयं = दयारहितं[7] दयितं = पतिं प्रति विरहिणी पत्नी एवं ब्रूते –

"हे अदय दयित ! परिमलबहलानां[8] नदीनां तथा परिमलबहलानां = परिमलयुक्तानां = आमोदबहलानां (सुगन्धयुक्तानां) मालतीनां = मालतीपुष्पाणां तथा परिमलबहलानां[9] लतीनां = रतीनां[10] च काले[11] आगतेऽपि = समागतेऽपि मदनदहनखिन्नां = कामाग्निदाहाकुलां दीनां च मा = माम् अत्र एत्य = आगत्य आत्मदृग्वारिणा = स्वकीयदृक्सलिलेन किं न सिञ्चसि ?" इति ।

वर्षाकाले वृष्टेराधिक्यात् नदीजलं पङ्कादिभिः मलैः सम्मिश्रितं भवति । अर्थात् वर्षाकाले नदीजलं मलैः प्रदूषितं भवति । अत एव अत्र 'परिमलबहलानाम्' नदीनाम् इति श्लोके भास्कराचार्येण लिखितम् । एवञ्च 'परिमलबहलानां लतीनाम्' इत्यस्य मानिनीनां मानिनां वा कामातुराणां मानभङ्गेन तुच्छत्वमापादयन्तीनां रतीनाम् इत्यर्थः । कामातुराः स्त्रीपुरुषाः स्वकीयकुलगौरवादिकं निर्लक्ष्यं कृत्वा केवलं काममेव लक्ष्यीकृत्य स्वकीयकुलगौरवस्य भङ्गे कारणीभूताः भवन्तीत्यर्थः ।

**उच्चैर्विरौति हि मयूरकुलं यदम्ब**[12]

**मन्दं कदम्बमकरन्दविमिश्रितश्च ।**

**वातः प्रवाति पतिरेति न तेन मन्ये**

**निर्घ्राणनिर्घृणविकर्णविहृत्त्वमस्य ॥**

**एवं विधं विरहिणी विरहेण खिन्ना**

**भिन्नाञ्जनच्छविघने गगने घनर्तौ ।**

**मत्वा प्रियं तमदयं हृदयं प्रविष्टं**

---

[6] सिद्धान्तशिरोमणिः – गोलाध्यायः – ऋतुवर्णनम् – श्लोकः ५

[7] दूरे स्थितत्वात् सः दयारहितः ।

[8] परि = समन्तात् मलबहलानां = मलैरावृतानां

[9] परस्य भावः परिमा, परिम्णो लवः परिमलवः, तं हरन्तीति परिमलवहराः + तासाम् = परिमलवहराणाम् । अत्र श्लेषालङ्कारे रलयोः वबयोश्च ऐक्यग्रहणात् परिमलवहराणाम् = परिमलबहलानाम् इति ज्ञेयम् ।

[10] रलयोरभेदकल्पनात् ।

[11] वर्षकाले

[12] अत्र 'अम्ब' इति पदेन अतिव्यथायां मातुः स्मरणं सूचितं भवति ।

**ब्रूते सपेशलमलं परिहासनिश्रम् ॥**[13]

“हे अम्ब ! वर्षाकालः समागतोऽस्ति । मयूरकुलं = बर्हिसमूहः उच्चैः = पृथुस्वरैः विरौति । कदम्बपुष्पस्य मकरन्देन विमिश्रितो वातो मन्दं मन्दं प्रवाति = वहति । तथापि मे पतिः रतिसुखमनुभोक्तुं मत्समीपं न एति । अत एव अहं मे पतिं निर्घ्राणम् = घ्राणेन्द्रियरहितम्, निर्घृणम् = करुणभावरहितम्, विकर्णम् = कर्णरहितम्, विहृत्वं = हृदयविहीनं च मन्ये ।”

भिन्नाञ्जनच्छविघनेन गगनेन सहिते घनर्तौ = वर्षर्तौ[14] स्वकीयपत्युः विरहेण खिन्ना विरहिणी पत्नी स्वकीयहृदयं प्रविष्टं प्रियं भर्तारम् (पतिम्) अदयं = करुणहीनं मत्वा सपेशलं = मधुरभावरहितं परिहासमिश्रं च एवंविधं वचनम् अलं = इति ब्रूते ।

अत्र श्लोके प्रयुक्तानां निर्घ्राणः, निर्घृणः, विकर्णः, विहृत् – एतेषां चतुर्णां विशेषणानाम् अस्य सन्दर्भस्यानुसारेण विवरणानि अधोनिर्दिष्टरीत्या सन्ति –

- यदि सः पतिः घ्राणेन्द्रिययुक्तो भवति तर्हि वर्षकाले कदम्बपुष्पस्य मकरन्दानां परिमलस्य आघ्राणं कृत्वा निश्चयेन अत्रागच्छति स्म । परन्तु सः अत्र नागतवान् । अतः सः ‘निर्घ्राणः’ भवति ।
- पुनश्च यदि सः करुणभावयुक्तः स्यात्तर्हि पत्न्याः विरहवेदनां ज्ञात्वा करुणया सः निश्चयेन तस्याः समीपमागच्छति स्म । किन्तु सः नागतवानेव । अतः सः ‘निर्घृणः’ = करुणभावरहितः अस्ति ।
- यदि सः कर्णयुक्तः स्यात्तर्हि अस्मिन् वर्षकाले मयूरकुलस्य उच्चरवं श्रुत्वा निश्चयेन अत्र विरहेण खिन्नां तत्पत्नीं दृष्ट्वा तस्याः समीपम् आगच्छति स्म एव । किन्तु सः नागतवान् । अतः सः ‘विकर्णः’ = कर्णरहितः भवति ।
- एवमेव तस्य पत्नी अत्र तस्य विरहेण अतीव खिन्ना भवति चेदपि तां द्रष्टुम्, तया साकं रतिसुखमनुभोक्तुं च सः नागतवानेव । अत एव सः ‘विहृत्’ = हृदयरहितः अस्ति ।

इत्थम् अत्र भास्कराचार्येण त्रिभिः श्लोकैः वर्षर्तोः वर्णनं काव्यरूपेण कृतम् । सारांशरूपेण वर्षर्तोः लक्षणानि अधोनिर्दिष्टरीत्या वक्तुं शक्नुमः –

- ✓ वर्षर्तौ अञ्जनवत् कृष्णवर्णयुक्ताः घनाः = मेघाः गगनमावृताः भवन्ति ।
- ✓ वर्षर्तौ कदम्बपुष्पस्य मकरन्दस्य परिमलेन विमिश्रितो वायुः मृदुना प्रवाति ।
- ✓ वर्षर्तौ मयूरकुलम् उच्चैः विरौति ।
- ✓ वर्षर्तौ नद्यः कलुषितजलैः पूर्णाः भवन्ति ।
- ✓ वर्षर्तौ परिमलयुक्तानि मालतीपुष्पाणि जायन्ते ।

**शरदृतोः वर्णनम्**

---

[13] सिद्धान्तशिरोमणिः – गोलाध्यायः – ऋतुवर्णनम् – ६, ७ श्लोकौ

[14] अञ्जनवत् कृष्णवर्णयुक्तैः मेघैः आवृतेन गगनेन संयुक्ते वर्षर्तौ इत्यभिप्रायः ।

**स्वतनुजवनराज्या पुष्पवत्याश्लिषन्त्या**

**ह्यनुचितकृतसङ्गोऽस्मीति शैलोऽनुतप्तः ।**

**निशि शशिकरचञ्चन्निर्झरैरश्रुकल्पैः**

**शरदि हृदिजखेदस्वेदवान् रोदतीव ॥**[15]

इत्यनेन श्लोकेन भास्कराचार्यः शरदृतोः वर्णनं चकार ।

अत्र श्लोके 'वनराजी' इत्यस्य वनसम्पत् (सस्यसम्पत्), लतापङ्क्तिः इत्यर्थः । तानि सस्यानि पर्वतस्य शरीरे जातानि इति हेतोः पर्वतस्य तनुजाः (पुत्र्यः) इति विशेषणं दत्तम् । ताः वनराज्यः पुष्पवत्यः भवन्ति । पुष्पशब्दस्य कुसुम इत्यपि अर्थो विद्यते, आर्तवः इत्यपि अर्थो विद्यते । अतः अत्र श्लोके, "स्वतनुजवनराज्या पुष्पवत्या" इत्यत्र **"अनेकार्थशब्दविन्यासः श्लेषः"** इति नियमानुसारेण श्लोषालङ्कारो विद्यते । एवं श्लेषालङ्कारेण भास्कराचार्यः श्लोकमेनं रचयाञ्चकार ।

शरदृतौ रात्रौ (निशि) चन्द्रस्य कराणां = किरणानां सस्यसम्पदा समृद्धे पर्वते विद्यमानैः जलपातैः प्रतिफलनं जायते । तेन प्रतिफलनेन जनितेन प्रकाशेन स्वकीयशरीरोत्पन्नया (स्वतनुजया) पुष्पवत्या = पुष्पभरितया वनराज्या (सस्यसम्पदा) संयुक्तः शैलः = पर्वतः स्वकीयतनुजया पुष्पवत्या = ऋतुमत्या वनराज्या आश्लिषन्तीव दृश्यते । एवं रजस्वलाभिः स्वपुत्रिसदृशसस्यैः आश्लिष्टः पर्वतः स्वपुत्र्या एव रतिभोगम् अनुभवन्नस्मि, अतोऽहम् अनुचितकृतसङ्गः अस्मीति निर्झररूपैः = जलपातरूपैः अश्रुकम्पैः = अश्रुधाराभिः हृदिजखेदस्वेदवान् सन् रोदितीव (हृदये बहुव्यथामनुभूय रोदनं करोतीव) भाति = दृश्यते ।

एवं भास्कराचार्यः श्लोषालङ्कारयुक्तेन पद्येन शरदृतुं वर्णयामास । सारांशरूपेण शरदृतोः लक्षणानि अधोनिर्दिष्टरीत्या लेखितुं शक्नुमः –

१. शरदृतौ सस्यानि पुष्पस्भरितानि (कुसुमयुक्तानि) भवन्ति ।

२. पर्वतेषु जलपाताः दृश्यन्ते ।

३. आकाशो मेघरहितस्सन् स्वच्छो भवति । अतः शरदृतौ आकाशे चन्द्रो नक्षत्राणि च स्पष्टतया दृश्यन्ते ।

### १.१.१. हेमन्तर्तोः वर्णनम्

**सहस्यकाले बहुसस्यशालिनीं चितामवश्यायकमौक्तिकोत्करैः**[16] **।**

**प्रहृष्टपुष्टाखिलगोकुलामिलां विलोक्य हृष्यन्त्यधिकं कृषीवलाः ॥**[17]

इत्यनेन श्लोकेन भास्कराचार्यो हेमन्तर्तोः वर्णनं चकार ।

सहस्यकालो नाम पुष्यमासः । अत्र सहस्यकाले इति हेमन्तर्तोः एकदेशग्रहणम् । अत्रोक्तप्राकृतिकलक्षणानि समग्रे हेमन्तर्तौ सम्भवन्तीति अवगन्तव्यम् ।

---

[15] सिद्धान्तशिरोमणिः – गोलाध्यायः – ऋतुवर्णनम् – श्लोकः ८

[16] 'अवश्यायः' इति पदस्य 'हिमः' इत्यर्थः । उत्करो नाम समूहः ।

[17] सिद्धान्तशिरोमणिः – गोलाध्यायः – ऋतुवर्णनम् – श्लोकः ९

सहस्यकाले = पुष्यमासे (हेमन्तर्तौ) बहुसस्यशालिनीं = बहुविधसस्यैः शोभमानाम् अवश्यायकमौक्तिकोत्करैः = हिमरूपमौक्तिककणानां समूहैः चितां = आवृतां तथा प्रहृष्टपुष्टाम् अखिलगोकुलाम् इलाम् अवलोक्य कृषीवलाः अधिकं हृष्यन्ति = सन्तोषं प्राप्नुवन्ति ।

सारांशरूपेण हेमन्तर्तोः प्राकृतिकलक्षणानि अधोनिर्दिष्टरीत्या वक्तुं शक्नुमः –

१. हेमन्तर्तौ भूमिः बहुविधैः सस्यैः शोभमाना भवति ।

२. हेमन्तर्तौ गवादीनां पशूनां कृते भक्षणार्थं बहुविधानि धान्यानि लभ्यन्ते । तानि धान्यानि भक्षयन्तो गवादयः पशवः पुष्टाः (दृढकायाः) सन्तुष्टाश्च भवन्ति । तैः सन्तुष्टैः गोकुलैः = गोसमूहैः इला = भूः आवृता भवति ।

३. हेमन्तर्तौ धान्यसस्येषु धान्यानि फलितानि भवन्तीति हेतोः कृषीवलाः सन्तुष्टाः भवन्ति ।

### १.१.२. शिशिरर्तोः वर्णनम्

भास्कराचार्यो द्वाभ्यां श्लोकाभ्यां शिशिरर्तोः वर्णनं चकार । तद्यथा –

**अरुणनीलनिमीलितपल्लवं प्रचुरफुल्लसमुल्लसनैः श्रियम् ।**

**वहति काञ्चन काञ्चनकाननं नवतरां नितरां शिशिरागमे ॥**[18]

शिशिरर्तोः समागमे सति अरुण-नीलवर्णाभ्यां निमीलितैः पल्लवैः प्रचुराणां = बहूनां फुल्लानां = पुष्पाणां समुल्लसनैः = विकसनैः शोभमानैः काञ्चनवृक्षैः आवृतं काञ्चनकाननं नितरां नवतरां श्रियं वहति ।

अत्र काञ्चन इत्यस्य काञ्चनवृक्षाः इत्यर्थः । काञ्चन इत्येकदेशग्रहणं कृतम् ।

**अपटुतिग्ममरीचिमरीचिभिर्नहि तथा शिशिरे शिशिरक्षतिः ।**

**निशि यथोष्मलपीनघनस्तनी भुजनिपीडनतः स्वपतां नृणाम् ॥**[19]

श्लोकेऽस्मिन् भास्कराचार्येण शिशिरर्तौ शैत्यस्य तीव्रता वर्णिता ।

“शिशिरकाले अपटुतिग्ममरीचिमरीचिभिः = अतिपटुत्वरहितैः (अतितीक्ष्णत्वरहितैः) सूर्यकिरणैः शिशिरक्षतिः = शैत्यनाशः तथा न भवति यथा निशि = रात्रौ उष्मलपीनघनस्तन्याः युवत्याः भुजनिपीडनतः = आलिङ्गनेन शय्यायां स्वपतां नृणां = पुरुषाणां शैत्यस्य नाशो न भवति तथा” इति श्लोकस्यास्याभिप्रायः ।

एवं भास्कराचार्येण श्लोकद्वयेन शिशिरर्तोः यद्वर्णनं कृतं तत् सारांशरूपेण एवं लेखितुं शक्नुमः –

१. शिशिरे शैत्यम् अतिशयेन भवति ।

२. काञ्चनवृक्षेषु अरुणनीलवर्णाभ्यां शोभमानाः नूतनाः पल्लवाः, बहूनि पुष्पाणि च शिशिरर्तौ उत्पद्यन्ते ।

इत्थं भास्कराचार्येण सूर्यस्फुटज्ञानोपयुक्तवर्षचरणज्ञानाय गोलाध्याये यन्त्राध्यायानन्तरम् ऋतुवर्णनं कृतं काव्यशैल्या । भास्कराचार्यस्यानन्तरकालीनेन ज्ञानराजाख्येन गणकेन विरचिते सिद्धन्तसुन्दरग्रन्थेऽपि वयम् ऋतुवर्णनं द्रष्टुं प्रभवामः ।

---

[18] सिद्धान्तशिरोमणिः – गोलाध्यायः – ऋतुवर्णनम् – श्लोकः १०

[19] सिद्धान्तशिरोमणिः – गोलाध्यायः – ऋतुवर्णनम् – श्लोकः ११

**निष्कर्षः –** प्राचीनकाले प्रकृतिः मालिन्यरहिता आसीत् । अतस्तदा ऋतुलक्षणानि यथासमयं दृश्यन्ते स्म । अतः प्राचीनकाले ऋतुचिह्नैः वर्षचरणज्ञानं स्पष्टतया भवति स्म । परन्तु वर्तमानकाले मनुष्यस्य हस्तक्षेपेण प्रकृतिः अतिशयेन मलिना सञ्जाता । अतो वर्तमानकाले ऋतुचिह्नानि यथासमयं न दृश्यन्ते । कदाचित् वृष्टिकाले घर्मो भवति, घर्मकाले वृष्टिः भवति । अतो वर्तमानकाले ऋतुचिह्नानां द्वारा वर्षचरणान् स्पष्टतया ज्ञातुं न पारयामः । परम् आधुनिककाले सूर्योदयवेधेन वयं वर्षचरणान् ज्ञातुं शक्नुमः । तद्यथा – सूर्योदयो यदि पूर्वस्वस्तिकादुत्तरतो भवति, अद्यतनसूर्योदयात् श्वस्तनसूर्योदयोऽपि उत्तरत एव भवति तर्हि वर्तमानकाले उत्तरगोले उत्तरायणं प्रचलतीत्यर्थः । उत्तरगोले उत्तरायणं नाम मेषादिराशित्रयम् । अर्थात् वर्षस्य प्रथमचरणः । सूर्योदयः पूर्वस्वस्तिकादुत्तरतो जातः, परम् अद्यतनसूर्योदयात् श्वस्तनसूर्योदयो दक्षिणतो जातश्चेत् वर्तमानकाले उत्तरगोले दक्षिणायनं प्रचलतीत्यर्थः । उत्तरगोले दक्षिणायनं नाम कर्क्यादिराशित्रयम् । अर्थात् वर्षस्य द्वितीयचरणः । सूर्योदयो यदि पूर्वस्वस्तिकाद्दक्षिणतो भवति, अद्यततसूर्योदयात् श्वस्तनसूर्योदयोऽपि दक्षिणत एव भवति तर्हि वर्तमानकाले दक्षिणगोले दक्षिणायनं प्रचलतीत्यर्थः । दक्षिणगोले दक्षिणायनं नाम तुलादिरशित्रयम् । अर्थात् वर्षस्य तृतीयचरणः । सूर्योदयः पूर्वस्वस्तिकाद्दक्षिणत एव भवति, किन्तु अद्यतनसूर्योदयात् श्वस्तनसूर्योदयः उत्तरतो भवति चेत् दक्षिणगोले उत्तरायणं प्रचलतीत्यर्थः । दक्षिणगोले उत्तरायणं नाम मकरादिराशित्रयम् । अर्थात् वर्षस्य तुरीयचरणः । इत्थं सूर्योदयः पूर्वस्वस्तिकात् कस्यां दिशि जायते इत्यनेन गोलज्ञानं भवति, अद्यतनसूर्योदयात् श्वस्तनसूर्योदयः कस्यां दिशि जायते इत्यनेन अयनज्ञानं भवति । गोलायनयोर्ज्ञानेन वर्षचरणज्ञानं भवति । वर्षचरणज्ञानेन सूर्यभुजांशैः सूर्यस्फुटो ज्ञायते । इत्थं वर्तमानकाले यद्यपि ऋतुलक्षणैः सूर्यस्फुटं स्पष्टतया ज्ञातुं न प्रभवामस्तथापि सूर्योदयवेधेन स्फुटतया सूर्यस्फुटं ज्ञातुं प्रभवाम इति निष्कर्षं दातुं शक्नुमः ।

## सन्दर्भग्रन्थसूची


1. **श्रीमद्भास्कराचार्यप्रणीतः सिद्धान्तशिरोमणिः – स्वोपज्ञवासनाभाष्यसंवलितो नृसिंहदैवज्ञकृतवार्त्तिकोपेतश्च;** सम्पादकः – डॉ.मुरलीधरचतुर्वेदः; तृतीयं संस्करणम्; संस्करणवर्षम् – सा.यु.२०१०; प्रकाशनसंस्था – सम्पूर्णानन्दसंस्कृतविश्वविद्यालयः, वाराणसी
2. **सिद्धान्तसार्वभौमः – द्वितीयो भागः, ग्रन्थकर्ता –** मुनीश्वरः, प्रकाशनवर्षम् – सा.यु.१९३५, प्रकाशनसंस्था – राजकीयसंस्कृतमहाविद्यालयः, वाराणसी
3. **सिद्धान्ततत्त्वविवेकः – प्रथमो भागः,** ग्रन्थकर्ता – कमलाकरभट्टः, व्याख्याकारः – श्रीगङ्गाधरशर्मा, द्वितीयसंस्करणम्, संस्करणवर्षम् – सा.यु.२०१७, प्रकाशनसंस्था – सम्पूर्णानन्दसंस्कृतविश्वविद्यालयः, वाराणसी
4. **सिद्धान्तशेखरः ;** ग्रन्थकर्ता – श्रीपतिः, व्याख्याकारः – सत्यदेवशर्मा, प्रकाशनसंस्था – चौखम्बा कृष्णदास अकादमी, वाराणसी
5. **सिद्धान्तशिरोमणेर्गोलाध्यायस्योपपत्तिः –** लेखकः – डॉ. प्रेमकुमारशर्मा, संस्करणम् : सा.यु.२००५, प्रकाशनसंस्था – नागप्रकाशनम्, नवदेहली
6. **अर्वाचीनं ज्योतिर्विज्ञानम्;** ग्रन्थकर्ता – श्रीरमानाथसहायः; प्रकाशनवर्षम् – सा.यु.१९९६; प्रकाशनसंस्था – सम्पूर्णानन्दसंस्कृतविश्वविद्यालयः, वाराणसी
7. **ज्योतिर्विज्ञानम्;** ग्रन्थकर्ता – धूलिपाल अर्कसोमयाजी; प्रकाशनवर्षम् – सा.यु.१९६४; प्रकाशनसंस्था – सम्पूर्णानन्दसंस्कृतविश्वविद्यालयः, वाराणसी
8. **ज्योतिष-सिद्धान्त-मञ्जूषा;** ग्रन्थकर्ता – डॉ. विनयकुमारपाण्डेयः; संस्करणवर्षम् – सा.यु.२०२०; प्रकाशनसंस्था – चौखम्बा सुरभारती प्रकाशनम्, वाराणसी

9. **मन्दशीघ्रफलसाधनसमीक्षा;** ग्रन्थकर्ता – विद्यावाचस्पतिः डॉ. रामजीवनमिश्रः; प्रथमसंस्करणम् – सा.यु.२००५; प्रकाशनसंस्था – ठाकुरप्रकाशनम्
10. **सुराकान्तसङ्कलितः ज्योतिर्विज्ञानशब्दकोषः**; लेखनं सम्पादनञ्च – डॉ. सुराकान्तझा; प्रथमं संस्करणम्; संस्करणवर्षम् – सा.यु.२००९; प्रकाशनसंस्था – चौखम्बा कृष्णदास अकादमी, वाराणसी
11. **सूर्यसिद्धान्तः (आर्षग्रन्थः)**; व्याख्याकारः – श्रीकपिलेश्वरशास्त्री; संस्करणवर्षम् – सा.यु.२०१५; प्रकाशनसंस्था – चौखम्भा संस्कृतभवनम्, वाराणसी
12. **म.म.सुधाकरद्विवेदिप्रणीतया 'सुधावर्षिणी'टीकया संवलितः सूर्यसिद्धान्तः;** सम्पादकः – विद्यावारिधिः श्रीकृष्णचन्द्रद्विवेदी; द्वितीयं संस्करणम्; संस्करणवर्षम् – सा.यु.२०१६; प्रकाशनसंस्था – सम्पूर्णानन्दसंस्कृतविश्वविद्यालयः, वाराणसी
13. **भास्करीयगोलमीमांसा;** प्रधानसम्पादकः – प्रो. वाचस्पति उपाध्यायः, लेखकः – प्रो. देवीप्रसादत्रिपाठी, सम्पादकः – प्रो. रमेशकुमारपाण्डेयः, संस्करणम् – सा.यु.२०१०, प्रकाशनसंस्था – श्रीलालबहादुरशास्त्रीराष्ट्रियसंस्कृतविश्वविद्यालयः, नवदेहली
14. **उपपत्तीन्दुशेखरः;** महामहोपध्यायश्रीदुर्गाप्रसादद्विवेदेन सङ्कलितः, सम्पादकः – श्रीगिरिजाप्रसादद्विवेदी, संस्करणम् – सा.यु.२००८, प्रकाशनसंस्था – भारतीयबुक् कारपोरेशन् – नवदेहली
15. **सिद्धान्तसुन्दरम्;** ग्रन्थकर्ता – ज्ञानराजः, सम्पादकः – डॉ. सदानन्दशुक्लः, संस्करणवर्षम् – सा.यु. २००८, प्रकाशनसंस्था – सम्पूर्णानन्दसंस्कृतविश्वविद्यालयः, वाराणसी